# श्री विष्ण्वष्टकं

श्री विष्ण्वष्टकं

विष्णुं विशालारुणपद्मनेत्रं
विभांतमीशांबुजयोनिपूजितं |
सनातनं सन्मतिशोधितं परं
पुमांसमाद्यं सततं प्रपद्ये || 1 ||

कळ्याणदं कामफलप्रदायकं
कारुण्यरूपं कलिकल्मषघ्नं |
कळानिधिं कामतनूजमाद्यं
नमामि लक्ष्मीशमहं महांतं || 2 ||

पीतांबरं भृंगनिभं पितामह-
-प्रमुख्यवंद्यं जगदादिदेवं |
किरीटकेयूरमुखैः प्रशोभितं
श्रीकेशवं संततमानतोऽस्मि || 3 ||

भुजंगतल्पं भुवनैकनाथं
पुनः पुनः स्वीकृतकायमाद्यं |
पुरंदराद्यैरपि वंदितं सदा
मुकुंदमत्यंतमनोहरं भजे || 4 ||

क्षीरांबुराशेरभितः स्फुरंतं
शयानमाद्यंतविहीनमव्ययं |
सत्सेवितं सारसनाभमुच्चैः
विघोषितं केशिनिषूदनं भजे || 5 ||

भक्तार्तिहंतारमहर्निशं तं
मुनींद्रपुष्पांजलिपादपंकजं |
भवघ्नमाधारमहाश्रयं परं
परापरं पंकजलोचनं भजे || 6 ||

नारायणं दानवकाननानलं
नतप्रियं नामविहीनमव्ययं |
हर्तुं भुवो भारमनंतविग्रहं
स्वस्वीकृतक्ष्मावरमीडितोऽस्मि || 7 ||

नमोऽस्तु ते नाथ वरप्रदायिन्
नमोऽस्तु ते केशव किंकरोऽस्मि |
नमोऽस्तु ते नारदपूजितांघ्रे
नमो नमस्त्वच्चरणं प्रपद्ये || 8 ||

विष्णवष्टकमिदं पुण्यं यः पठेद्भक्तितो नरः |
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ||

इति श्री नारायणगुरु विरचितं श्री विष्णवष्टकं |